International Journal of Sanskrit Research 2018; 4(3): 168-169

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 168-169
© 2018 IJSR
www.anantaajournal.com
Received: 12-03-2018
Accepted: 15-04-2018

डॉ० मनोज कुमार मिश्र
जयदेवपट्टी, कुर्सो नदियामी,
घनश्यामपुर, दरभंगा, बिहार, भारत

Corresponding Author:
डॉ० मनोज कुमार मिश्र
जयदेवपट्टी, कुर्सो नदियामी,
घनश्यामपुर, दरभंगा, बिहार, भारत

# कर्मकाण्डस्वरूपं यज्ञपात्राणि च

डॉ० मनोज कुमार मिश्र

**देव्या यया ततमिदं जगदात्मशक्त्या**
**निश्शेषदेवगणशक्तिसमूहमूर्त्या।**
**ताम्म्बिकामखिलदेवमहर्षिपूज्यां**
**भक्त्या नताः स्म विदधातु शुभानि सा नः।।**

–दुर्गासप्तशती।

**प्रस्तावना**

अन्यत्र सात्त्विक–राजस–तामसभेदेन त्रिविधम् यागाहिंसादि च कर्म उच्यते। वेदस्य प्रायोगिके रूपे कर्मकाण्डेऽत्र प्रसङ्.गे नित्य–नैमित्तिक– काम्य– प्रायश्चित –निषिद्धिभेदात् क्रियास्वरूपं कर्म पञ्चविधम्। नैमित्तिके प्रायश्चित्तस्यान्तर्भावत् प्रायः कर्म चतुर्विधमेव।

''वेदाऽखिलो धर्ममूलम्'' इति। वेदेन कर्त्तव्यतया बोधितो योऽर्थः स धर्मः, तस्यैव धर्मकृत्यस्य कर्मकाण्डमिति व्यवहारः। कर्मकाण्डविषये आदौ कर्मस्वरूपं प्रस्तूयते। कर्म–क्रियत इति विग्रहे भावे कर्मणि चार्थे ''सर्वधातुभ्यो मनिन्'' [1] इत्युणादिसूत्रेण 'मनिन्' प्रत्यये कृते कर्मशब्दो निष्पद्यते। कर्मशब्दोऽयं विभिन्नशास्त्रदृष्ट्या नानाविधार्थकः। वैयाकरणदृष्ट्या कर्मत्त्वं च परसमवेतधात्वर्थजन्यफलशालित्वं नाम। यत क्रियते तत् कर्म इति प्रसिद्धेः। करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैर्वत् साध्यते तत् कर्म नाम। अत एव क्रियाव्याप्यं कर्म उच्चते। तत् कर्म चतुर्विधम्–

1. निर्वर्त्यम्–यथा पटम् करोति, पुत्रं प्रसूतै।
2. विकार्यम्–तदपि द्विविधम्।

क) प्रकृेरुच्छेकं–यथा–वनं भस्म करोति।
ख) गुणान्तराधायकम्–यथा सुवर्ण कुण्डलं करोति।

3. प्राप्यम्–यथा ग्रामं गच्छति, सूर्यम् पश्यति।
4. अनीप्सितम्–यथा पापं त्यजति।

अमरकोशानुसारेण– ''कर्मक्रिया तत्सातत्ये गम्ये स्युरपरस्पराः।'' कर्मशब्दः क्रियाशब्दश्च अनर्थान्तरवचनः। न्यायवैशेषिकदृष्ट्या च कर्म– ''द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः। तत्र पदार्थेषु तृतीयः पदार्थः कर्म। तत् च तत्र ''उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनेति'' भेदैः पञ्चविधम्।

ज्योतिर्विद्दृष्ट्या–लग्नाद् दशमं स्थानं दशमं लग्नं कर्म कथ्यते। ''तैर्लग्नाम्बद्यूनकर्माणि केन्द्रमुक्तं च कष्टकम्'' इति कर्मणः केन्द्रकण्टकसंज्ञापि क्रियते। यजुर्वेदे– ''कुर्वन्नेवह कर्माणि जिजीविषेच्छतं समाः'' इत्यस्य भाष्ये अग्निहोत्रादीनि कर्माणि इति प्रतिपादितानि अथ च कर्मपदेन ऋग्वेदे बहूनां मन्त्राणां भाष्यकारैर्यज्ञादीनां लोकपरलोकाभ्युदयकारकलौकिककार्याणां मन्त्रब्राह्मणात्मकवेद– तन्मूलकशास्त्रेषु प्रतिपादितानां विभिन्नधार्मिकव्यापाराणाम् अदृष्टसाधकानां निर्देशात् तानि एव तत्त्वानि अत्र कर्मपदवाच्यानि कर्मपदेन गृहीतानि सन्ति।

कर्मस्वरूपविवेचनानन्तरम् प्रसङ्.गतः काण्डस्वरूपं प्रस्तूयते– कमण्डम्– कनतीति विग्रहे कनी दीप्तौ इति कन् धातोः 'ञमन्ताड्डः' [2] इति सूत्रेण ड.प्रत्यये बाहुलकात् 'चुटू' इत्यस्या–प्रवृत्तौ अनुबन्धलोपे ''क्वादिभ्यः कित्'' [3] सूत्रेण कित्संज्ञायाम् ''अनुनासिकस्य क्विझलोः क्डि.ति'' [4] इति अनुनासिकान्तस्याड्.गस्य कन् इत्यस्य उपधायाः दीर्घे, अनुस्वारपरसवर्णादिकार्ये काण्डम् इति शब्दो निष्पद्यते।

अमरकोषानुसारेण–''काण्डोऽस्त्री दण्डबाणार्व–वर्गावसरवारिषु'' इति। तथा चास्यानेकेऽर्था भवन्ति– दण्डः, बाणः, अवसरः, जलम्, शरवृक्षः, अर्वा, कुत्सितः, वर्गः (वर्गश्च एकजातीयसमवायः) इति।

यथाह भागवते– ''क्रिया काण्डेषु निष्णातो योगेषु च कुरुद्वह।'' काण्डर्षिः, काण्डस्य वेदविभागस्य ऋषिः, यद्वा काण्डेषु एकातीयक्रियादिसमवायेषु ऋषिर्विचारकः इति। शब्दकल्पद्रुमोक्त्यनुसारेण– ''काण्डं चावसरे चाणो नाले स्कन्धे च शाखिनाम्।..... स्तम्बे रहसि वर्गे च''

इति धरणिकोशानुसारेण च काण्डशब्दो हि अनेकार्थः। तेषु अनेकार्थेषु अत्र एकजातीयक्रियासमवायः वर्गः (एकजातीयसमवायो वा) अर्थो गृहीतोऽस्ति।

श्रौतसूत्रे– वैकङ्.कतानि पात्राणि, खादिरः स्त्रुवः स्फयश्च, पालाशी जुहूः, आश्वत्त्थी उपभृत्। वाररणान्यहोम संयुक्तानि। बाहुमात्र्यः स्त्रुचः पाणिमात्रपुष्करा त्वग्विला हंसमुखप्रसेका मूलदण्डा भवन्ति। अरत्निमात्रः स्रुवः अङ्.गुष्ठपर्ववृत्तपुष्करः। स्फयस्याकृतिः आदर्शाकृतिः। प्राशित्रहरणं चमसाकृतिर्वा। चात्त्वालोत्करान्तरेण सञ्चरः प्रणीतोत्त्कराविष्टिषु। कात्यायनश्रौतसूत्रे सर्वाणि यज्ञपात्राणि वैकङ्.कतानि। यथा उलूखलमुसले, कूर्च्चः, इडापात्री शम्या श्रृतावदानमेक्षण– भूर्युपवेशान्तर्धानकटप्राशित्रहरण–षडवत्तब्रह्मयजामानासन–होतृषद्नादीना भवन्ति।

उलूखलं च मुसलं स्वायत्ते (सुदृढे) तदुलूखलः यद्वोभौ वारणौ कायौ तद्भावेऽन्यवृक्षजौ। कौशः कूर्ग्यो बाहुमात्रो मकराकार उच्यते। इच्छाप्रमाणा तु दृषत्प्रोक्ता पाषाणसंभवा।। उपलो वर्त्तुलः प्रोक्तो वितस्तिपरिमाणकः इडापात्री तथा चान्यारत्निमात्रा प्रकीर्तिता।। प्रोक्ता हविर्धानपात्री विपुला द्वादशाङ्.गुला। पिष्टपात्री च सैवोक्ता चतुरस्त्रा प्रकीर्तिता। तद्यथा–

पुराडाशस्य पात्री तु चतुरस्त्रा समानतः।
खातेन वर्तुलेनैव युता यज्ञे प्रशस्यते।।
शम्या प्रादेशमात्री स्यात् खादिरः स्फ्यः प्रकीर्तितः।
खङ्.गकारोऽरत्निमात्रो वज्ररूपो मखे स्मृतः।।
अङ्.गुष्ठपर्वमात्रं तु तीक्ष्णाग्रं पृथुवक्रकम्।
श्रृतावदानं प्रादेशमात्रं दीर्घमुदाहृतम्।।
इध्मजातीयमिध्मार्धं प्रमाणं मेक्षणं भवेत्।
अभ्रिस्तीक्ष्णमुखा ज्ञेया खादिरारत्निसम्मिता।।
उपवेशोऽरत्निमात्रो हस्ताकारस्तु खादिरः।
अन्तर्धानकटः प्रोक्तो द्वादशाङ्.गुलसम्मितः।।
अर्धचन्द्रसमाकारः किञ्चिदुछ्तिशीर्षकः।
षडङ्.गुलप्राणं तु षडवत्तं चतुरस्त्रकम्।।
यथा चोभयतः खातं वारणं तत्प्रचक्षते।
यजमानासनं पत्न्या आसनं च पृथक् पृथक्।।
होत्रासनं तथा ब्रह्मासन विस्तारयोगतः।
अरत्निमात्राण्येतानि कथितानि मनीषिभिः।।
ओङ्.कारप्रौढमूलः क्रमपदसहितश्छन्दविस्तीर्णशाखः,
ऋक्पत्रः सामपुष्पो यजुरधिकफलोऽथर्वगन्धं द्धानः।
यज्ञच्छज्ञयासमेतो द्विजमधुपगणैः सेव्यमानः प्रभाते,
मध्ये सायं त्रिकालं सुचरितचरितः पातु मां वेदवृक्षः।।[5]

**निष्कर्षः**

कर्मपदेन मन्त्रब्राह्मणात्केषु वेदेषु तन्मूलकशास्त्रेषु श्रौतगृह्य–धर्मसूत्र–स्मृति–पुराणागमादिषु अन्येषु धर्मग्रन्थतया मान्यभारतीयवाङ्.मयेषु साक्षात्प्रतिपादिताः तत्त्द्वचनच्छायाश्रिता वा लोकपरलोकाभ्युदयसाधकादृष्ट– शक्तिविशेषोत्पादकाः विभिन्नाः धार्मिकव्यवहाराः अघटितघटनाघटकानि अदृष्टाज्ञातविशेषशक्तिमन्ति विभिन्न–व्यापाररूपाणि कानिचन विशिष्टकार्याणि यज्ञयागपूजापाठहोमजपतन्त्रमन्त्रधर्मकर्मस्तुतिप्रभृति– भिविविधनामभिः सृयादि्तोऽद्य यावत् स्थितानि तत्त्वानि चात्र कर्मपदेन् गृहीतानि, बोद्धव्यानि। काण्डपदात् वर्गाः (कर्मसमवायाः) एकजातीयक्रियासमवायाः एकजातीयसमवाया वा बोद्धव्याः। कर्मकाण्डं नाम भौतिकपदार्थानुबिद्धो मानवेन्द्रियाणामसत्प्रवृत्तिनिरोधकः ऐहिकामुष्मिक– फलप्राप्तिकामनया क्रियमाणः सम्प्रदायानुसृतः समाजानुमोदितो व्यापारः।

**संदर्भः**

1. पाणिनीयसूत्रम्।
2. उ0– 111 ।
3. उ0– 112 ।
4. पा0– 6.4.14 ।
5. श्रीशोभाकन्तस्य स्मृतिग्रन्थः।